PAPER - 4

# MT

2017 .... .... 1200 Seat No. | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II PAPER - IV**

**Time : 3 Hours** **(Pages 10)** **Marks : 80**

## प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

अनन्तभट्टः सोमशर्माणम् उपचरितुं ...... इच्छति । किन्तु तदर्थं सः ...... अपेक्षते ।

(सहर्षम् / सशोकम्) (विपुलं धनम् / नियमपालनम्)

II) पूर्णवाक्येन उत्तरत । १

सोमशर्मा केन जागरितः ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

सोमशर्माणः जीवनशैली अनारोग्यदायिनी ।

चन्द्रपुरनाम्नि नगरे सोमशर्मा नाम धनिको वणिग् निवसति स्म । तस्य नैके व्यवसायाः आसन् । उद्योगव्यग्रः स गच्छता कालेन अस्वास्थ्यमनुभवति स्म । नैके उपचारा जाताः, परं सर्वे विफलाः । एकस्मिन् दिने तस्मै अनन्तभट्टवैद्यस्य विषये केनापि कथितम् । ततस्तमानेतुं तेन धनिकेन सत्वरं सेवकः प्रेषितः । किन्तु सेवकेन आनीते सन्देशे लिखितमासीत्, 'भवन्तमुपचरितुं सानन्दमिच्छामि । तथापि मया मम नियमानां पालनमपेक्ष्यते । चिकित्सामभिलषन् रुग्णः स्वयमेव मम समीपे आगच्छतु । कृपया सूर्योदयादनन्तरं पद्भ्यामेव आगच्छतु ।'अनिच्छयैव अन्येद्युः सोमशर्मा अनन्तभट्टं प्रति पद्भ्यामेव गतवान् । बालसूर्यस्य किरणेषु पद्भ्यां चलनेन प्रसन्नः सोमशर्मा, ''कृपया, भवान् सत्वरमुपचारं करोतु । शीघ्रं गन्तव्यं मया,'' इत्यवदत्। अनन्तभट्टोऽभाषत, ''भोः, भवान् प्रतिदिनं प्रभाते करणीयानि कार्याणि समाप्य उद्यानस्य निकटे प्रवहतो निर्झरस्य जले स्नात्वा प्रत्यागच्छतु।'' अनन्तभट्टस्यादेशेन उद्विग्नः सोमशर्मा तत्स्थानं गत्वा स्नानं कृतवान् । शुचिर्भूतः सोमशर्मा अनन्तभट्टस्य गृहं प्रत्यागतवान् । ततस्तस्य वैद्यस्य पत्न्या परिवेषितं सात्त्विकमल्पं प्रातराशं भक्षयित्वा सन्तुष्टोऽभवत्। अनन्तरं सः अनन्तभट्टेन सह उद्याने आम्रवृक्षस्याधः दोलायामुपविष्टः । औषधानां विषये वारं वारं सोमशर्मणा पृष्टे सति अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत्। दोलायामुपविष्टः सोमशर्मा शनैः शनैः निद्राधीनो जातः । सहसा लघ्वाघातेन जागरितः सोमशर्मा संकोचेनावदत्, ''क्षम्यताम् । निद्रापीडितोऽहं कदा सुप्तः इति न जाने । अतश्चकितोऽहम् । कृपया भवान् मम उपचारान् कथयति किम् ?''

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) योग्यं पर्यायं चिनुत । १

१) सूर्योदयादनन्तरम् -............ + अनन्तरम् । (सूर्योदयात् / सूर्योदयात्)

२) संकोचेनावदत् - संकोचेन +............। (आवदत् / अवदत् )

II) समूहेतरपदं लिखत । १

१) वाटिका : उद्यानम् :: निष्फलाः : ............ ।

२) स्वामी : सेवकः :: आरभ्य : ............ ।

III) विशेष्यविशेषणानां मेलनं कुरुत । १

| अ | ब |
|---|---|
| i) वणिग् | एकस्मिन् |
| ii) दिने | धनिकः |

IV) गद्यांशात् चित्वा द्वे पूर्वकालवाचक धातुसाधित - अव्यये लिखत । १

३. **स्वमतप्रकटनम् ।** २

'आरोग्यमेव सम्पद्' इति विषयम् अनुसृत्य माध्यमभाषया लिखत ।

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

१) यदा विद्युत्प्रवाहः खण्डितः तदा ............ चर्चा प्रारब्धा । (चित्रपटविषये / ऊर्जाविषये)

२) यदि कारणं नष्टं तर्हि कार्यस्य ............ कुतः ? (फलं / उपयोजनं)

II) कः कं वदति । १

ऊर्जा नाम कार्यशक्तिः ।

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

ऊर्जाविपत्तिः एका समस्या विद्यते ।

पार्थः - हन्त, वसन्ततौ परीक्षासमय एव भारनियमनं वर्तते । ऊर्जाविपत्तिस्तु वर्धत एव प्रतिदिनम् ।

अथर्वः - मया पठितम्, ननु ऊर्जा त्वक्षया । तत्कथमूर्जाविपत्तिः ?

श्रेया - सत्यम्, ऊर्जा त्वक्षया एव । परमूर्जासाधनानि तु मर्यादितान्येव । नष्टे कारणे कुतः कार्योत्पत्तिः ?

अथर्वः - परं का नाम ऊर्जा ? कानि तस्याः रूपाणि ?

श्रेया - ऊर्जा नाम कार्यशक्तिः । ऊष्मा, प्रकाशः, ध्वनिः, विद्युदादीनि बहूनि तस्याः रूपाणि ।

पार्थः - परं कानि तस्याः साधनानि ?

श्रेया - पारम्परिकाणि अपारम्परिकाणि च तस्याः साधनानि । कृष्णाङ्गाराः, खनितैलं, नैसर्गिकवायुश्चेति पारम्परिकाणि । दशलक्षाधिकवर्षेभ्यः पूर्वं निर्जीवीभूताः प्राण्यंशाः सस्यांशाश्च मृत्तिकायाः महाशिलानां च बहुभारेणान्तःसम्पीडनाद् द्रववायुरूपं प्राप्नुवन्ति। तद् द्रवरूपेन्धनम् अपरिष्कृतं तैलमित्युच्यते । तदेव कृष्णसुवर्णमिति ।

पार्थः - तस्योपस्कारार्थं महाप्रयासः आवश्यकः । भूमौ रन्ध्रं निर्माय निष्कास्य च तस्य संस्करणं क्रियते । तत्संस्करणाद् इन्धनतैलं, मृत्तैलं, स्वेदनतैलादिकं निष्पाद्यते। एतन्निसर्गाल्लभ्यते, तस्मात्तस्योपलब्धिः मर्यादिता ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

१) वर्धत एव - .......... + एव । २) मर्यादितान्येव - .......... + एव ।

II) समूहेतरपदं लिखत । १

१) बलम्, प्रकृतिः, शक्तिः । - ........ २) प्रयत्नः, प्रयासः, नादः । - ........

III) विशेषण-विशेष्य-अन्वितिः । ......... , ........ ऊर्जा १

IV) गद्यांशे आगते द्वे पञ्चमी - विभक्त्यन्तपदे लिखत । १

**३. पृथक्करणम् । यथाक्रमं घटनाः लिखित्वा प्रवाहिजालचित्रम् पूरयत ।** २

(द्रववायुरूपप्राप्तिः,
निर्जीवीभूतानां, प्राण्यांशानां,
महाशिलादीनां बहुभारेण
सम्पीडनम्, अपरिष्कृततैलनिर्माणम्,
भूमौ रन्ध्रं निर्माय तस्य निष्कासनं
तथा च संस्करणम्)



**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) विनायकः कलानुरागी अभवत् यतः ........... (ऑटोरॉथफिल्डमहोदयः विनायकं मार्गदर्शनम् अकरोत् । / विनायकस्य पिता तस्मिन् कलासंस्कारान् समारोपितवान् ।) १

II) पूर्णवाक्येन उत्तरं लिखत । १

ग्रामस्थमन्दिरे विनायकेन कस्य चित्रं विलेखितम् ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

विनायकस्य रुचिः केवलं चित्रकलायाम् ।

अस्ति कोंकणप्रदेशे रायगडजनपदे कश्चिद् ग्रामः सासवणेनाम । समुद्रं निकषा एवाध्युषितं प्रकृतिरम्यस्थलं ननु । तत्र वर्तते नयनरम्यः चित्ताकर्षकः करमरकरशिल्पालयः । नैतत् केवलं ग्रामभूषणं परं कलावतां तथैव कलारसिकानां कृते पण्ढरपुरमिव तीर्थक्षेत्रम् । ग्रामेऽस्मिन् पाण्डुरङ्गकरमरकरनाम्नः कृषीवलस्य सङ्गीत-चित्र-कलादिभिः परिपूर्णं, शान्तिसुखयोः निधानमिव गृहमासीत् । तत्र एकनवाष्टैकतमे ख्रिस्ताब्दे (१८९१) ऑक्टोबरमासस्य द्वितीये दिने पुत्रजन्मोत्सवः सम्पन्नः जातः । एष विनायकः नाम बालः बाल्य एव पित्रा सह मृत्प्रतिमाः निर्मातुं प्रारभत । विविधप्राणिनां देवतानां च प्रतिमानिर्माणे तस्यासीद् रुचिः । पुस्तकस्थानां विविधचित्राणां पुनर्विलेखनेऽपि स मग्न आसीत् । सततं निरीक्षमाणेन तस्य पित्राऽपि तस्मिन् समुचितसंस्काराः समारोपिताः । एकदा ग्रामस्थराममन्दिरेऽनेन छत्रपतिशिवरायस्य चित्रं विलेखितम् । तस्मिन् समये अलिबागमण्डलाधिकारी ऑटोरॉथफिल्डमहोदयः ग्रामस्य व्यवस्थापननिरीक्षणार्थमागतः । दृष्टमात्रे तस्मिन् चित्रे तन्मनः प्रहृष्टम् । अतस्तेन विनायकः मुम्बईस्थितं जे. जे. महाविद्यालयं प्रवेशितः । तत्रापि स्वप्रतिभया कौशल्येन च विनायकेन प्रथमः क्रमाङ्कः प्राप्तः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत - योग्यं पर्यायं चिनुत । १

१) मन्दिरेऽनेन - ......... + ......... । (मन्दिरे + अनेन । / मन्दिरः + अनेन ।)

२) नैतत् - ......... + ......... । (ने + एतत् । / न + एतत् ।)

II) समूहेतरपदं लिखत । १

१) ग्रामः, खेटः, पुरम्, राज्यम् । - ..........

२) समीपे, निकषा, पुरतः, निकटे । - ..........

III) विशेषण-विशेष्य-अन्वितिः । १

......... , ........ करमरकर - शिल्पालयः ।

IV) गद्यांशात् चित्वा के अपि द्वे सप्तमी - विभक्त्यन्तपदे लिखत । १

**३. पृथक्करणम् । जालचित्रं पूरयत ।** २



**द्वितीयः विभागः - पद्यम् ।**

**१. पृथक्करणम् । जालचित्रं पूरयत ।** २




नमामि राष्ट्रध्वजं त्रिवर्णात्मकं नैकवारम् ।
स्मारयते मां कीर्तिकथा यो महतामनवरतम् ।।१।।
सस्यगर्भिणी धरणी हरिता
स्वेदबिन्दुभिर्यैरभिषिक्ता
तेषामेव श्रमेण फलिता हसति मेदिनीयम्
हरितक्रान्त्यास्तद् हरितत्वं ध्वजेऽपि पल्लवितम् ।
ध्वजे स्थितेयं हरिताभा मां प्रेरयते सततम्
'जयतु किसानो' वदन्ती ह्यहं नमामि तं कृषकम् ।।२।।

**२. स्पष्टीकरणम् ।** २

'नमामि राष्ट्रध्वजम्' इति काव्याधारेण राष्ट्रध्वजः हरितवर्णं कथं प्राप्नोत् इति माध्यमभाषया लिखत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

आसीत् कोऽपि प्रतिष्ठाने तपोदत्त इति द्विजः ।
स पित्रा क्लेश्यमानोऽपि विद्यां नाध्यैत शैशवे ।।१।।
अनन्तरं गर्ह्यमाणः सर्वैरनुशयान्वितः ।
स विद्यासिद्धये तप्तुं तपो गङ्गातटं ययौ ।।२।।
तत्राश्रितोग्रतपसस्तस्य तं वीक्ष्य विस्मितः ।
वारयिष्यन् द्विजच्छद्मा शक्रो निकटमाययौ ।।३।।
आगत्य च स गङ्गायास्तटाच्चिक्षेप वारिणि ।
उद्धृत्योद्धृत्य सिकताः पश्यतस्तस्य सोर्मिणि ।।४।।

**१. शब्दज्ञानम् ।**

I) समूहेतरपदं लिखत । १

१) निकटम् : दूरे :: ययौ : ............... ।

२) शक्रः : इन्द्रः :: चकितः : ............... ।

II) पद्यांशेभ्यः विशेषणे चित्वा लिखत । ......., ......., तपोदत्तः । १

२. **अन्वयपूर्तिः ।** २

..... आश्रितोग्रतपसः तस्य तं वीक्ष्य ..... शक्रः तं ..... द्विजच्छद्मा तस्य ..... आययौ ।

क) **द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) वंशभवो ........... महिमानम् ।।

ii) गजाननं ........... पादपङ्कजम् ।।

iii) कदर्थितस्यापि ........... कदाचिदेव ।।

ड) **वृत्तनाम चिनुत ।** १

अङ्गेन गात्रं नयनेन वक्त्रं न्यायेन राज्यं लवणेन भोज्यम् ।
धर्मेण हीनं खलु जीवितञ्च चन्द्रं विना भाति तथा न रात्रिः ।।

उपेन्द्रवज्रा / इन्द्रवज्रा / गीतिः)

**तृतीयः विभागः - स्थूलवाचनम् ।**

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् ।**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

यस्मिन् गृहे चित्रकला वसति तत्र अमाङ्गल्यं प्रतिष्ठितम् ।

II) एकपदेन उत्तरं लिखत । १

कः संवादः विष्णुधर्मोत्तरपुराणे प्रख्यातः ?

'विष्णुधर्मोत्तरपुराणम्' इति अस्मिन् ग्रन्थे चित्रकलाशास्त्रं विस्तरेण वर्णितं विद्यते । 'मार्कण्डेय-वज्रसंवादः' तत्र प्रख्यातः । वज्रमहाराजेन, ''लोके-परलोके सुखसाधनं किम् इति' पृष्टे सति मार्कण्डेयमुनिः चित्रकलायाः श्रेष्ठत्वम् इत्थं उक्तवान्-

यथा सुमेरुः प्रवरो नगानां यथाण्डजानां गरुडः प्रधानः ।
यथा नराणां प्रवरः क्षितीशः तथा कलानामिह चित्रकल्पः ।।

कलया न केवलं कलावताम् अपि तु सामान्यजनानाम् अपि सुखप्राप्तिः भवति ।

कलानां प्रवरं चित्रं धर्मकामार्थमोक्षदम् ।
माङ्गल्यं प्रथमं चैतद् गृहे यत्र प्रतिष्ठितम् ।।

अस्याः चित्रकलायाः प्रवर्तकः आसीद् धर्मसुतः नारायणः यः देवानां शिल्पी । सामान्येन चित्ररेखाः, आकारः, प्रकाशच्छाया च प्राधान्यं वहन्ति । चित्रे सादृश्यकरणं प्रधानं परिकीर्तितम्। स्थानं, प्रमाणं, मधुरत्वं, भूलम्भः, विभक्तता, सादृश्यं, क्षयः तथैव वृद्धिरित्येते अष्टगुणाः चित्रे अनुस्यूताः भवेयुः । तैः चित्रस्य सौन्दर्यं वर्धते । चित्रकलायां वर्णविन्यासे एवं चित्रकारस्य परीक्षा भवति नैपुण्यमपि च आविष्कृतं भवति । श्वेतः, रक्तः, पीतः, कृष्णः, हरितश्चैते पञ्च प्रधानवर्णाः विदिताः।

२. **पृथक्करणम् ।** २




## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) कथापूर्तिः ।**

**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।** ५

प्रभञ्जनो नाम झञ्झावातः आत्मनः अनुजं मन्दपवनम् अपृच्छत् मत्सदृशः शक्तिमान् भवितुं नेच्छसि किम्। तस्य सा ....... अनुत्तरिता एवावर्तत। तदा स्वमाहात्म्यं पुनः एकवारं कथयितुं प्रभञ्जनः प्राह मन्दपवनं, वत्स पश्य, यदाहं वहामि तदा मम आगमनं सुदूरं सूच्यते। सर्वत्र वार्ता प्रसरति। भयभीताः जनाः इतस्ततो धावन्ति। पशुपक्षिणः अपि संत्रस्ता जायन्ते। सागरः अपि ....... भवति। पर्वतप्रायाः तरङ्गाः तस्मिन् उद्भवन्ति। एतत्सर्वं श्रुत्वा किं न कामयसे मत्सदृशः .......। ततः किमपि अवदन् मन्दपवनः मार्गस्थः अभवत्। अत्रान्तरे ....... स गतः तत्र तरङ्गिताः नद्यः शान्तं प्रवहन्ति स्म। सस्यानि सानन्दं कम्पन्ते स्म। मनुजाः उत्साहिताः अभवन्। खगाः मन्दं मन्दम् अकूजन्। प्रभञ्जनेन पृष्टस्य प्रश्नस्य उत्तरं मन्दपवनेन कार्येण .......। एवं सुजनाः अपि न कदापि वृथा जल्पन्ते। कार्येणैव ते वदन्ति।

(प्रक्षुब्धः, भवितुम्, पृच्छा, दत्तम्, यत्र)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. मम प्रिय नेता । २. स्वातन्त्र्योत्सवः । ३. सागरः ।

**क) संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) A cloth-bag is always with me.

ii) Tell the story of cunning jackal.

iii) Sea water is salty.

iv) Ripe mango is yellow.

v) Peacock-feather looks beautiful on the head of Lord Krishna.

vi) The main job of the news reporter is to collect the news.

vii) Laziness is the greatest enemy of a man.

viii) We got freedom in 1947.

**ड) वाक्यरचना।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) आ + रुह् १ प.प. २) कुप् ४ प.प.

३) स्निह् ४ प.प. ४) रक्ष् १ प.प.

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) तस्मै विष्णुं नमः । २) शालायाः उभयतः वृक्षाः सन्ति ।

३) शोकात् अलम् । ४) माता सह बालिका आपणं गच्छति ।

**पञ्चमः विभागः - व्याकरणम् ।**

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| भाष् १ आ.प. | भाषिष्यते | ........ | भाषते | अभाषत | ........ | ........ |
| दा ३ आ.प. | ........ | ददे | ........ | ........ | दत्ताम् | ........ |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तृतीया | ...... | वणिग्भ्याम् | ...... |
| सप्तमी | नामनि | ...... | ...... |
| प्रथमा | ...... | ...... | काः |
| पञ्चमी | ...... | आवाभ्याम् | ...... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

( निर्मितवान्, प्रवहतः, गन्तव्यम्, पठितम्, गच्छता, रम्यम्, प्रहृष्टम्, पूजितवती )

**ड) समासाः ।**

**मेलनं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | समासविग्रहः | समासनामानि |
|---|---|---|
| i) | जीर्णा कुटी | तृतीया तत्पुरुष समास |
| ii) | चतुर्णां पथां समाहारः | उपपद तत्पुरुष समास |
| iii) | वैविध्येन पूर्णम् | कर्मधारय समास |
| iv) | खं गच्छन्ति इति | सह बहुव्रीहि समास |
| v) | कलापूर्णा कृतिः | द्विगु समास |
| vi) | सुष्ठु निश्चितम् | मध्यमपदलोपी कर्मधारय समास |
| vii) | अक्षरैः सहिता | षष्ठी तत्पुरुष समास |
| viii) | नराणाम् इन्द्रः | प्रादि तत्पुरुष समास |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) भरतमुनिना नाट्यशास्त्रं विरचितम् । (प्रयोगपरिवर्तनं कुरुत ।)

ii) त्वं यथेच्छसि तथा कुरु । ('भवान्' योजयत ।)

iii) रत्नेषु लुप्तेषु बहुषु अमर्त्यैः, अद्यापि रत्नाकरः एव सिन्धुः । (सतिसप्तमीरचनां निष्कासयत ।)

iv) दशाननः स्वर्गं गच्छति । (राम) (प्रयोजकरचनां कुरुत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) दिनस्य ........... भोजनं पर्याप्तम् अस्ति । (twice)

ii) राष्ट्रध्वजे ................. वर्णाः दृश्यन्ते । (3)

iii) सन्तः सुकृतपादपाः इति रूपकं .............. श्लोके वर्तते । (5th)

iv) अष्टाध्यायी नाम ............... अध्यायानां समाहारः । (8)

## षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

एकदा दुर्बुद्धिः आनन्दमग्नं सुबुद्धिम् अपृच्छत्, ''भवतः आनन्दस्य शान्तेश्च किं रहस्यम्?'' सुबुद्धिः उवाच, ''मित्र । मम चत्वारः अङ्गरक्षकाः सन्ति। प्रथमं तु सत्यं यत् माम् अपराधात् सर्वदा रक्षति । द्वितीयः स्नेहः, अहं सर्वान् कर्मचारिणः पुत्रवत् मन्ये। तृतीयः न्यायः, यः मामन्यायात् रक्षति। चतुर्थः त्यागः, मां दानाय प्रेरयति । अतः एतेषां सहायतया अहं सर्वदा आनन्देन जीवामि लोकहितं च करोमि इति ।'' दुर्बुद्धिः श्रद्धया तस्य चरणयोः अपतत् ।

**ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

i) कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।
अविचार्य प्रियं कुर्यात् तन्मित्रं मित्रमुच्यते ।।

ii) रोग-शोक-परीताप-बन्धन-व्यसनानि च ।
आत्मापराधवृक्षाणां फलान्येतानि देहिनाम् ।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

दरिद्रः – राजन् ! शिवस्य मरणं वर्षशतकात् पूर्वमारब्धमासीत्। अधुना अचिरमेव समाप्तिम् अगच्छत्।

राजा – आश्चर्यम् ! कथं तत् सम्भवम् ?

दरिद्रः – श्रुणोतु राजन् ! स किल हरिहररूपः। अतः अर्धं शरीरं हरिः अर्थात् भगवान् विष्णुः अहरत्।

राजा – अन्यत् अर्धम्?

दरिद्रः – स पुनः अर्धनारीश्वरः अपि तस्मात् अन्यदर्धं पार्वतीदेवी अनयत्।

**Best of Luck**